श्रुतिभूषणः। आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान्। सत्यधर्म्ममयः श्रीमान् क्रमविक्रमसत्कृतः। क्रियासत्रमहावोणः पुश्रुजानुर्म्महाकृतिः। उद्गात्रन्त्रो होमलिङ्गो वीजौषधिमहाफलः। वाय्वन्तरात्मा सत्रस्फिक् विकृतः सोमशोणितः। वेदस्कन्धो हविर्गन्धो हव्यकव्यातिवेगवान्। प्राग्वंशकायो द्युतिमान्नानादीक्षाभिरन्वितः। दक्षिणाहृदयो योगी महासत्रमयो महान्। उपाकर्म्मौष्ठरुचकः प्रवर्ग्यावर्त्तभूषणः। नानाच्छन्दोगतिपथो गुह्योपनिषदासनः। छायापत्नीसहायो वै मणिशृङ्ग इवोच्छ्रितः। भूत्वा यज्ञवराहोऽसौ द्रागधः प्राविशद्गुरुः”।

“रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव! यदध्वरात्मकम्। छन्दांसि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्वङ्घ्रिषु चातुर्होत्रम्। स्रुक्तुण्ड आसीत् स्रुव ईश! नासयोरिडोदरे चमसाः कर्णरन्ध्रे। प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणन्ते भगवन्नग्निहोत्रम्। दीक्षानुजन्मोपसदः शिरोधरं ते प्रायणीयोदयनीयदंष्ट्र!। जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यं चितयोऽसवो हि ते। सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव! धातवः!। सत्राणि सर्वाणि शरीरसन्धयस्त्वं सर्वयज्ञक्रतुरिष्टिबन्धनः”। भाग० ३।१३अ०।

“यज्ञात्मतां प्रपञ्चयन्तः स्तुवन्ति रूपमित्यादि चतुर्भिः छन्दांसि गायत्र्यादीनि यज्ञाङ्गभूतछन्दआद्यनुवादेन भगवदवयवता विधीयते बर्हिःशब्दे दीर्घाभाव आर्षः दृशि चक्षुषि चातुर्होत्रं हौत्रादिचतुष्टयं कर्म्म। स्रुक् जुहूः। तुण्डे मुखाग्रे। स्रुवो नासिकयोः। इडा भक्षणपात्रं चमसा ग्रहाश्च सोमपात्राणि। प्राशित्रं ब्रह्मभागपात्रं ग्रस्यतेऽनेनेति ग्रसनं मुखान्तर्वर्त्ति च्छिद्रं चर्वणं भक्षणम्। दीक्षा दीक्षणीयेष्टिः। अनुजन्म वारं वारम् अभिव्याप्तिः। उपसदस्तिस्र इष्टयः शिरोधरं ग्रीवा। प्रायणीया दीक्षानन्तरेष्टिः उदयनीया समाप्तीष्टिः ते एव दंष्ट्रे यस्य। प्रवर्ग्यो महावीरः प्रत्युपसदः पूर्व्वं क्रियते। सभ्यो होमरहितोऽग्निः आवसथ्यः औपासनाग्निः ततो द्वन्द्वैक्यं तव क्रतुरूपस्य शीर्षकं शिरः। चितयः इष्टकाचयनानि पञ्च असवः प्राणाः। प्रातःसवनादीनि अवस्थितिरासनं बाल्याद्यवस्था वा। अग्निष्टोमोऽत्यग्निष्टोमः उक्थ्यः षोडशी वाजपेयोऽतिरात्रः आप्तोर्यामः इति सप्त संस्थाविभेदाः सप्त त्वङ्मांसादिधातवः। सत्राणि द्वादशाहादीनि बहुयागसङ्घातरूपाणि, असोमा–यज्ञाः ससोमाः क्रतवस्तद्रूपस्त्वं इष्टियजनं अनुष्ठानञ्च तदेव बन्धनं यस्य सः” श्रीधरः। [प्राशस्त्यात् तथात्वम्।

**क्रतुपशु** पु० क्रतोरङ्गं पशुः। अश्वे हारा० तस्य अश्वमेधे

**क्रतुप्रा** पु० क्रतून् कर्म्माणि प्राति प्रा-पूर्त्तौ क्विप्। कर्म्मपूरके “महस्वर्कैर्ववर्तः क्रतुप्राः” ऋ० ४।३८।२। “क्रतुप्राः कर्मणां पूरकः” भा०।

**क्रतुभुज्** पु० क्रतुं क्रतुदेयं हविर्भुङ्क्ते भुज–क्विप्। देवे क्रतुदेयद्रव्यत्यागोद्देश्यत्वात्तेषामचेतनत्वेऽपि तद्भोगित्वं बोध्यम् चेतनत्वे तु तेषां मनुष्यादीनामिव भोगो नास्ति किन्तु दृष्टिमात्रेण यथाह “न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति” छा०उ०।

**क्रतुराज्** पु० क्रतुषु राजते राज–क्विप्। १अश्वमेधे यज्ञे तस्य सर्वयज्ञानां श्रेष्ठत्वात् तथात्वम्। “यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः” मनुः २राजसूये च शब्दचि०

**क्रतुविक्रयिन्** त्रि० क्रतुं तत्फलं विक्रीणाति वि+क्री–णिनि। स्वकीयक्रतुफलस्य अन्यदीयत्वख्यापनेन ततो धनग्राहके। “पिशुनानृतिनोश्चापि क्रतुविक्रयिणस्तथा” मनुः। [ चाप्सरसौ” यजु० १५।१५।

**क्रतुस्थला** स्त्री अप्सरोभेदे “पुञ्जिकस्थला च क्रतुस्थला

**क्रतुस्पृश्** त्रि० क्रतुमिन्द्रियं स्पृशति क्विन्। इन्द्रियस्पर्शिनि “अपश्यन् हृदिस्पृक् क्रतुस्पृक्” आश्व०श्रौ० ५।१०.५

**क्रतूत्तम** पु० क्रतुषूत्तमः। राजसूययज्ञे त्रिका०।

**क्रत्वर्थ** पु० क्रतवेऽयम् अर्थेन सह नित्यस० विशेष्यलिङ्गता च, क्रतुरर्थोयस्य वा। क्रतूपकारके। तल्लक्षणादिकञ्च जै० सू० भाष्ययोर्दर्शितं यथा

“अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा” १सू०। “तृतीयेऽध्याये श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानैः शेषविनियोगलक्षणमुक्तम्। इह इदानीं क्रत्वर्थपुरुषार्थौ जिज्ञास्येते,—कः क्रत्वर्थः? कः पुरुषार्थः? इति, यापि प्रयोजकाप्रयोजकफलविध्यर्थवादाङ्गप्रधानचिन्ता, सापि क्रत्वर्थपुरुषार्थजिज्ञासैव। कथम्?। अङ्गं क्रत्वर्थः, प्रधानं पुरुषार्थः, फलविधिः पुरुषार्थः, अर्थवादः क्रत्वर्थः, प्रयोजकः कश्चित् पुरुषार्थो, ऽप्रयोजकः क्रत्वर्थः। तस्मात् “क्रत्वर्थपुरुषार्थयोर्जिज्ञासा”—इति सूत्रितम्। तत्र अथातःशब्दौ प्रथमे एवाध्याये प्रथमसूत्रे वर्णितौ। अथेति प्रकृतं शेषविनियोगलक्षणमपेक्षते। अतः—इति क्रत्वर्थपुरुषार्थजिज्ञासाविशेषं प्रकुरुते। क्रतवे यः, स